# ब्रिलिएंट पब्लिक स्कूल

**सीपत रोड, बहतराई, बिलासपुर (छ.ग.)**

**पूर्व संकलित परीक्षा -I,- 2017-18**

**कक्षा - दशमः**

**विषयः- संस्कृतम**

कालावधि : होरात्रयम् | पूर्णांकः 80
दिनांकः 05.01.2018 | दिवसः शुक्रवासरः

**निर्देशः 1.** अस्मिन् प्रश्न-पत्रे चत्वारि खंडानि सन्ति।

**खंडः 'क'** *अपठितांश-अवबोधनम्* (10 अङ्काः)
**खंडः 'ख'** *रचनात्मक-कार्यम्* (15 अङ्काः)
**खंडः 'ग'** *अनुप्रयुक्त- व्याकरणम्* (25 अङ्काः)
**खंडः 'घ'** *पठित-अवबोधनम्* (30 अङ्काः)

**2.** सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## खंड {क} अपठितांश–अवबोधनम् (10 अङ्काः)

**1.** अधोदत्तम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।

जीवने सफलतायाः आधारः पुरुषार्थः एव! अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति! यदा यदा नरः पुरुषार्थम् अचिनोत तदा तदा तेन सफलता प्राप्ता! पुरुषार्थिनः एवम् संसारे विलक्षणप्रतिभाम् अर्जितवन्तः! अनेन एवम् ऐवरेस्टशिखरम् अजयत् अंतरिक्षं च अगच्छत्। नरः! देशसेवया समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि! अस्माकम् इतिहासे तेषां गौरवगानं विद्यते! आपत्काले येषां मनांसि विचलितानि न भवन्ति। ते एव जीवने सफलतां प्राप्नुवन्ति! पुरुषार्थिनाम् कृते तु पुरुषार्थः एव उपासना अस्ति! यः जनःस्वजीवन सफलतां प्राप्तुम् इच्छति सः पुरुषार्थः अवश्यमेवं कुर्यात। पुरुषार्थस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते।

I. एकपदेन उत्तरत। (4×1/2 = 2)

(i) जीवने सफलतायाः आधारः किम्?
(ii) केषां कृते पुरुषार्थः उपासना अस्ति?
(iii) के संसारे विलक्षण प्रतिभाम् अर्जितवन्तः?
(iv) कस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते?

II. पूर्णवाक्येन उत्तरत। (*पूर्ण वाक्य में उत्तर दीजिए।*) (2×2 = 4)

(i) येषां मनांसि आपत्काले विचलितानि न भवन्ति ते किं कुर्वन्ति?
(ii) जीवने सफलतायाः आधारः कः?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (4×1/2 = 2)

(i) 'प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम्?
(क) पुरुषार्थी
(ख) पुरुषार्थिनः
(ग) ते
(घ) कार्याणि

(ii) 'अपयशः' इति पदस्य विपर्ययपदं गद्यांशे किम् प्रयुक्तम्?
(क) विलक्षणम् (ख) कार्यम्
(ग) पुरुषार्थः (घ) यशः

(iii) 'मानवः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?
(क) सुखः (ख) नरः
(ग) करः (घ) कृते

(iv) 'उल्लेखनीयानि' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?
(क) कृतानि (ख) कार्याणि
(ग) पुरुषार्थः (घ) प्रसारेण

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। (1×2 = 2)

Brilliant public school, Bilaspur
SAMPLE PAPERS

# खंड {ख} रचनात्मक–कार्यम्

**2.** भवतः नाम अब्दुलः अस्ति। छात्रावासे च भवान् वसति। विद्यालयपर्यटन कार्यक्रमस्य अनुमतिहेतोः पितरं प्रति लिखितं पत्रम् मञ्जूषायां दत्तैः पदैः पूरयतु। (1/2 × 10 = 5)

(i)..........

(ii)..........

अत्र सर्वं कुशलम्। इदं निवेदनं यत् अधुना प्रथम-सत्रीया परीक्षा (iii).......... । अतः सर्वे छात्राः मिलित्वा शिमलानगरम् पर्यटनस्थलं प्रति गमिष्यन्ति। तत्र अहमपि (iv).......... इच्छामि। व्ययार्थं मम (v).......... पर्याप्तं धनमस्ति। त्रयः (vi).......... अपि अस्माभिः सह गमिष्यन्ति। मनोरञ्जनेन सह अस्माकं ज्ञानम् अपि वर्धिष्यते अतः (vii).......... न करणीया। अतः अहम् (viii).......... अनुमतिं याचे। कृपया भवान् (ix).......... ददातु।

भवतः प्रियपुत्रः

(x)..........

**मञ्जूषा** चिन्ता, गन्तुम्, समाप्ता, पार्श्वे, नमोनमः, अध्यापकाः गाजियाबादतः, भवतां, अब्दुलः, अनुमतिं।

**3.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (2 × 5 = 10)




**मञ्जूषा** विद्यालयस्य, अयं, प्रवेशद्वारे, वृक्षाः, छात्राः, विद्यायाः मन्दिरम्, विद्यालयः, अत्र, पठनाय, अपि, आगच्छन्ति, अस्ति, सन्ति, भवति, क्षेत्रम्, आदर्शविद्यालयः चित्रे, बहवः, एकः, दृश्यन्ते, विद्यालयः।

***अथवा***

'जन्तुशालाः' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृते लिखत

**मञ्जूषा** सिंहः, तत्र, स्थिताः, अस्मान्, जन्तुशालायाः, वयं, च, पिंजरे, दृश्यते, न कर्त्तव्यम्, एकस्मिन्, कोणे, स्म, बद्धौ, अपश्याम् तीव्रं, जनाः, विचित्रं, चित्रकः, धावति, मृगद्वयं, अगच्छाम, दूषितं, पश्यन्ति, वातावरणं, अद्य, एकः।

# खंड {ग} अनुप्रयुक्त–व्याकरणम्

**4.** अधोलिखितवाक्येषु स्थूलपदानां समुचितं संधि विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (1 × 4 = 4)

*(i)* खगाः आकाशे **स्वच्छन्दं** विचरन्ति।

(क) स्वच् + छनदम (ख) स्व + छन्दम्

(ग) स्वः + छन्दम् (घ) स्व + च्छन्दम्

*(ii)* वेदानां **सामवेदोऽस्मि**।

(क) सामवेदा + अस्मि (ख) सामवेदः + अस्मि

(ग) सामवेदाः + अस्मि (घ) सामवेदः + स्मि

*(iii)* तर्हि **मत्+शिरः** ददामि।

(क) मशिरः (ख) मच्छिरः

(ग) मचिरः (घ) मछिर

*(iv)* छात्राः **विद्या + आलयं** गच्छन्ति।

(क) विद्योलयं (ख) विद्येलयम्

(ग) विद्यालयं (घ) विद्यलयम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं, विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (4 × 1 = 4)

*(i)* हे अर्जुनः <u>जयाजयौ</u> समे भूत्वा युद्धं कुरू।

(क) जयश्च अजयश्च

(ख) जये जेय

(ग) जया जये (घ) जये जये

*(ii)* <u>*दश आननानि यस्य सः*</u> लंकायाः राजा आसीत्।

(क) दशानमः (ख) दशाननः

(ग) दशानाय (घ) दशानेनः

Brilliant public School, Bilaspur
SAMPLE PAPERS

*(iii)* <u>सुखं च दुखं</u> समे कृत्वा कार्यं कुरू।

(क) सुखे दुखे　　(ख) सुख:दुखे

(ग) सुखं दुखौ　　(घ) सुखदुखे

*(iv)* गणेशस्य पिता <u>नीलकण्ठ:</u> अस्ति।

(क) नीलम् कंठ:

(ख) नीलेकण्ठ:

(ग) नील: कंठ: यस्य स:

(घ) नीले कण्ठे

**6.** अधोलिखितवाक्येषु स्थूलपदानां प्रकृतिप्रत्ययौ पृथक्-पृथक् कृत्वा पूरयत। (1×4 = 4)

*(i)* अस्माभि: वृक्षा: नित्यमेव **पोषणीया:**।

(क) पूष + अनीयर्　　(ख) पुष् + अनीयर्

(ग) पूष + आनीयट्　　(घ) पुष + नीय:

*(ii)* **पुत्रवान् भव** इति यमराज: वरं अयच्छत्।

(क) पुत्र + वान

(ख) पुत्र + शानच्

(ग) पुत्र + क्तवतु

(घ) पुत्र + मतुप्

*(iii)* शकुन्तला **बुद्धिमती** आसीत्।

(क) बुद्धि + मतुप्　　(ख) बुद्धि + मत

(ग) बुद्धि + शानच्　　(घ) बुद्धि + क्तवतु

*(iv)* मया दुग्धं **पा + तव्यत्**।

(क) पातव्यम्　　(ख) पानीयम्

(ग) पातव्या　　(घ) पिबति

**7.** अधोलिखितं संवादं समुचितं वाच्यपरिवर्तनम् पूरयत।

*(i)* **लता**—भवती सम्यक् ..........(कृ)। (3×1= 3)

(क) करोषि　　(ख) करोति

(ग) कुरुत:　　(घ) करोमि

*(ii)* **तेन**........ (छात्र) कथा लिख्यते।

(क) छात्राय　　(ख) छात्रेण

(ग) छात्रै:　　(घ) छात्र:

*(iii)* ......... (अस्मद्) अपि रामायणम् एव दृश्यते।

(क) अलम्　　(ख) मया

(ग) त्वया　　(घ) यूयम्

**8.** अधोलिखितं समय अङ्कानां स्थाने संस्कृतपदै: पूरयत। (4×1/2 = 2)

*(i)* रमा (5:00) ....... वादने उत्तिष्ठति।

(क) पादोनपञ्च　　(ख) षड्

(ग) पञ्च　　(घ) सपादपञ्च

*(ii)* सा (5:30) ....... वादने भ्रमणाय गच्छति।

(क) सार्द्धपञ्च (ख) पादोनषड् (ग) सपादषड् (घ) पञ्च

*(iii)* सा (6:00) ....... वादने स्नानं करोति।

(क) पादोनषड् (ख) सपादषड् (ग) सार्द्धषड् (घ) षड्

*(iv)* सा (6:30) ....... वादने विद्यालयं गच्छति।

(क) सपादषड् (ख) पादोनषड् (ग) सार्द्धषड् (घ) षड्

**9.** अधोलिखितवाक्येषु रिक्तस्थानानि उचित अव्ययपदं चित्वा पूरयत। (4×1= 4)

*(i)* ते जना: ......... धन्या: ये निरुत्साहिता: न भवन्ति।

(क) सदैव　　(ख) नूनम्　　(ग) एव　　(घ) इव

*(ii)* माम् अयं शोक: अग्नि: ......... दहति।

(क) अपि　　(ख) इव　　(ग) एव　　(घ) तदानीम्

*(iii)* अस्य प्रदेशस्य न केवलं प्रकृति: अपितु संस्कृति: ......... विविधा मनोहरा च अस्ति।

(क) पुरा　　(ख) अपि　　(ग) शनै:　　(घ) एव

*(iv)* उपवनं ......... नदी बहति।

(क) अभित:　　(ख) बहि:　　(ग) तथा　　(घ) पुरत:

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखित। (1×4 = 4)

*(i)* स: पत्रवाहक: <u>अस्मि</u>।

(क) स्त:　　(ख) असि　　(ग) स्थ:　　(घ) अस्ति

*(ii)* जनेभ्य: प्रतिदिनम् <u>आगतम्</u> पत्राणि वितरति।

(क) आगता:　(ख) आगते　(ग) आगताम्　(घ) आगत्य

*(iii)* अहं <u>स्वकर्मं</u> सदा निष्ठया करोमि।

(क) स्वकर्माणि　　(ख) स्वकर्मणि

(ग) स्वकर्म:　　(घ) स्वकर्म

*(iv)* <u>ता:</u> बालका: गृहस्य बहि: क्रीडन्ति।

(क) स:　　(ख) ते　　(ग) ता:　　(घ) तानि

Brilliant public school, Bilaspur
SAMPLE PAPERS

# खड {घ} पाठत–अवबाधनम्

**11.** (अ) अधोलिखितं गद्यांशं पठित्वा प्रदत्त पश्नानाम् उत्तराणि लिखत।

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदम् जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम् 'कियती प्राचीना इयं सृष्टिः!' नैव! तर्हि शृणुत ध्यानेन।

I. एकपदेन उत्तरत। (2×1=2)

(i) कालः कस्य उत्पत्तेः विकासस्य प्रलयस्य साक्षी अस्ति?

(i) कः विश्वस्य आत्मा?

II. पूर्णवाक्येन उत्तरत। (1×1/2 = 2)

(i) किं पुनः पुनः जायते विलीयते च?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (4×1/2=2)

(i) 'पश्यामि' इति क्रियापदस्य कर्तृपदं किं?

(क) अहम् (ख) परमहं
(ग) परम् (घ) सर्वं

(ii) 'समयः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) कालः (ख) खलु
(ग) अहम् (घ) जगतः

(iii) 'नवीना' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) प्राचीना (ख) कालः
(ग) इयं (घ) सृष्टि

(iv) 'अहं सर्वदा क्रियाकलापं पश्यामि' वाक्ये कर्तृपदं अस्ति?

(क) सृष्टि (ख) कालः
(ग) सर्वदा (घ) पश्यामि

(आ) अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्।

I. एकपदेन उत्तरत। (2 × 1 = 2)

(i) विद्यासमं किं न अस्ति?

(ii) केन समं दुःखम् न अस्ति?

II. पूर्णवाक्येन उत्तरत। (1× 2 = 2)

(i) त्याग समं किम् नास्ति?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (4 × 1/2 = 2)

(i) 'नेत्रं' इत्यर्थे पद्यांशे किं पदं प्रयुक्तं?

(क) चक्षुः (ख) तपः (ग) चक्षुः (घ) रागः

(ii) श्लोके 'सुखम्' इति पदस्य विपरीतार्थकम् पदं किं प्रयुक्तं?

(क) दुःखः (ख) दुख
(ग) दुःखम् (घ) दुःखाः

(iii) 'त्यागेन समम्' इति पदयोः स्थाने अत्र किम् पदं प्रयुक्तम्?

(क) त्यागात् समम् (ख) त्यागसमम्
(ग) त्यागसमानम् (घ) त्यागयुक्तम्

(iv) 'नास्ति' इति पदे सन्धिच्छेदम् कुरु?

(क) ना + अस्ति (ख) न + आस्ति
(ग) न + अस्ति (घ) ना + आस्ति

(इ) अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

**राजीवः** सोम! पश्य एतत् चित्रम्।
**सोमः** अतीव सुन्दरम्।
**शोभा** एतत् तु अजन्ता-गुहानाम् चित्रं प्रतीयते।
**राजीवः** आम्। महाराष्ट्रप्रदेशे स्थिताः एताः अजन्तागुहाः एव।
**सौरभः** अहो! दृष्टम्। अत्र तु अनेक-जातक-चित्राणि उट्टङ्कितानि सन्ति।
**देविकाः** जातकं किं भवति?
**राजीवः** अहं न जाने! आचार्यं प्रक्ष्यामः। (तत्र गत्वा)
**छात्राः** गुरुवर! जातकं किं भवति?
**आचार्यः** जातकम् अर्थात् जन्म 'जातकमाला' इति नाम्नि पुस्तके भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु, परहिताय सर्वस्वं त्यक्तव्यम्, इत्येव शिक्षितम्। एतादृशीम् एकां कथां कथयामि।

Brilliant public school, Bilaspur
SAMPLE PAPERS

**छात्राः** एवम्! वयम् एतादृशीम् कथाम् श्रोतुम् उत्सुकाः।

**आचार्यः** श्रूयताम् तावत्। बौद्धाचार्यस्य आर्यशूरस्य जातक मालायाः शिविजातक-आधारिता एषा कथा।

I. एकपदेन उत्तरत (2 × 1 = 2)

(i) अस्मिन् वार्तालापे कति पात्राणि वार्तालापं कुर्वन्ति?

(ii) कस्याः गुहानाम् चित्राणि प्रतीयन्ते?

II. पूर्णवाक्येन उत्तरत (1× 2 = 2)

(i) अजन्तागुहाः कस्मिन् प्रदेशे स्थिताः?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (4 × 1/2 = 2)

(i) 'जन्म' पदस्य कृते अत्र किं पदं प्रयुक्तम्?

(क) जन्मनः (ख) जीवितम्

(ग) जन्म (घ) जातकम्

(ii) 'भगवतः' इति पदं कस्य विशेषणम् अस्ति।

(क) बुद्धस्य (ख) शिवेः

(ग) ईश्वरस्य (घ) आर्यशूरस्य

(iii) 'मृतकम्' इति पदस्य विलोमः अस्ति।

(क) मृतम् (ख) जातकम्

(ग) जन्म (घ) जीवनम्

(iv) 'कथयामि' इति क्रियापदस्य किम् कर्तृपदम्?

(क) आचार्यः (ख) त्वम्

(ग) अहम् (घ) सः

**12.** अधोलिखितवाक्येषु स्थूलादानि आधृत्य प्रश्ननिर्माणं कुरुत। (1× 4 = 4)

(i) राजा **याचकेभ्यः** दानं ददाति स्म।

(क) काभ्यः (ख) केभ्यः

(ग) काभिः (घ) कया

(ii) **देशान्तरेभ्यः** जनाः तम् देशं आयान्ति स्म।

(क) काभ्यः (ख) काः

(ग) केभ्यः (घ) का

(iii) **विद्यया** समम् चक्षुः नास्ति।

(क) केन् (ख) कान्

(ग) कया (घ) काम्

(iv) **जलबिंदुनिपातेन** क्रमशः पूर्यते घटः

(क) कान् (ख) काम्

(ग) कम (घ) केन

**13.** मञ्जूषातः समुचितं पदं चित्वा अधोलिखि[त] श्लोकद्वयस्य अन्वयं पूरयत। (4 × 1/2 = [2])

(क) हंसः श्वेतः बकः श्वेतः, को भेदः बकहंसयोः
नीरक्षीरविवेके तु हंसो हंसः बको बकः।

**अन्वयः** हंसः ………, बकः ………, बकहंसयोः [क]
भेदः? ……… तु हंसः हंसः ……… बकः।

**मञ्जूषा** बकः, श्वेतः, श्वेतः, नीरक्षीरविवेके।

(ख) दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।
कर्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः।

**अन्वय** दास्यामि इति

(i) …… मनः (ii) …… कुरुते,

(iii) … ततः पापतरः कः (iv) ……।

**मञ्जूषा** स्यात्, कर्पण्यानिश्चितमतेः, अन्यथा, प्रतिज्ञाय।

**14.** स्थूलपदानां प्रसंगानुसारम् उचितम् अर्थं चि[त्वा] लिखत। (1× 4 = 4)

(i) दृष्टा दृष्टलाभाद्ये न्यायचये **पथि** स्थातव्यम्

(क) पर्यटने (ख) मार्गे

(ग) व्यवहारक्रमे (घ) कार्यपद्धति

(ii) जनकल्याण कर्मसु **रतः** प्रजाः पुत्रवत् पालयति स्म

(क) तृप्तः (ख) प्रसन्नः

(ग) मुग्धः (घ) संलग्नः

(iii) भवता **समीचीनं** न कृतं।

(क) सम्पूर्ण (ख) उचितं

(ग) सम्यकरूपेण (घ) समायोजकं

(iv) विद्यालये **बालचराणाम्** शिविरम् अस्ति।

(क) छात्राणाम्

(ख) बालिकानाम्

(ग) बालकानाम्

(घ) छात्रानाम्

Brilliant public school, Bilaspur
SAMPLE PAPERS